Prepp
Your Personal Exams Guide

Name & Signature of the Invigilator

..............................................................

..............................................................

# SANSKRIT

**PAPER – II**

**CODE-07**

OMR Answer Sheet No. :

Roll No. :

(in figures as in Hall Ticket)

Roll Number in words : ..................................................

..........................................................................................

Question Booklet Sl. No. **071166**

**Time : 2 Hours]** **No. of Printed Pages : 16** **[Maximum Marks : 200**

## Instructions for the Candidates

1. Write your Roll Number in the space provided on the top of this page.
2. This paper consists of **one hundred (100)** multiple choice type of questions. **All** questions are compulsory.
3. At the commencement of examination, the question booklet will be given to you. In the first 5 minutes, you are requested to open the booklet and compulsorily examine it as below :
   (i) To have access to the Question Booklet, tear off the paper seal on the edge of this cover page. Do not accept a booklet without sticker seal and do not accept an open booklet.
   (ii) Tally the number of pages and number of questions in the booklet with the information printed on the cover page. Faulty booklets due to pages/questions missing or duplicate or not in serial order or any other discrepancy should be got replaced immediately by a correct booklet from the invigilator within the period of 5 minutes. Afterwards, neither the Question Booklet will be replaced nor any extra time will be given.
   (iii) After this verification is over, the Test Booklet Number should be entered on the OMR Answer Sheet and the OMR Answer Sheet Number should be entered on this Test Booklet.
4. Each item has four alternative responses marked (A), (B), (C) and (D). You have to darken the oval as indicated below on the correct response against each item.

   **Example:** (A) ⬬ (C) (D) where (B) is the correct response.
5. Your responses to the items are to be indicated on the OMR Answer Sheet under Paper – II only. If you mark your response at any place other than in the oval in the OMR Answer Sheet, it will not be evaluated.
6. Rough Work is to be done in the end of this booklet.
7. If you write your Name, Roll Number, Phone Number or put any mark on any part of the OMR Answer Sheet, except for the space allotted for the relevant entries, which may disclose your identity, or use abusive language or employ any other unfair means, such as change of response by scratching or using white fluid, you will render yourself liable to disqualification.
8. You have to return the original OMR Answer Sheet to the invigilator at the end of the examination compulsorily and must not carry it with you outside the Examination Hall. You are however, allowed to carry original question booklet and duplicate copy of OMR Answer Sheet on conclusion of examination.
9. Use only Blue/Black Ball point pen.
10. Use of any calculator or any electronic devices or log table etc., are prohibited.
11. There shall be no negative marking.

## પરીક્ષાર્થીઓ માટે સૂચનાઓ

1. આ પાનાની ટોચ પર દર્શાવેલી જગ્યામાં તમારો રોલ નંબર લખો.
2. આ પ્રશ્નપત્રમાં બહુવૈકલ્પિક ઉત્તરો ધરાવતા સો (૧૦૦) પ્રશ્નો આપેલા છે. બધા જ પ્રશ્નો ફરજિયાત છે.
3. પરીક્ષાની શરૂઆતમાં આપને પ્રશ્નપુસ્તિકા આપવામાં આવશે. પ્રથમ પાંચ (૫) મિનિટ દરમ્યાન તમારે પ્રશ્નપુસ્તિકા ખોલી અને ફરજિયાતપણે નીચે મુજબ પરીક્ષણ કરવું :
   (i) પ્રશ્નપુસ્તિકાનો વપરાશ કરવા માટે આ કવર પૃષ્ઠની ધાર પર આપેલ સીલ સ્ટીકર ફાડી નાખો. કોઈપણ સંજોગોમાં સીલ સ્ટીકર વગરની કે ખુલ્લી પ્રશ્નપુસ્તિકા સ્વીકારશો નહીં.
   (ii) કવર પૃષ્ઠ પર છપાયેલ નિર્દેશાનુસાર પ્રશ્નપુસ્તિકાના પ્રશ્નો, પૃષ્ઠો અને સંખ્યાને બરાબર ચકાસી લો. ખામીયુક્ત પ્રશ્નપુસ્તિકા કે જેમાં પ્રશ્નો/ પૃષ્ઠો ઓછાં હોય, બે વાર છપાયા હોય, અનુક્રમમાં અથવા અન્ય કોઈ ફરક હોય અર્થાત કોઈપણ સંજોગોમાં ખામીયુક્ત પ્રશ્નપુસ્તિકા સ્વીકારશો નહીં. અને જો ખામીયુક્ત પ્રશ્નપુસ્તિકા મળી હોય તો નિરીક્ષક પાસેથી તુરંત જ બીજી સારી પ્રશ્નપુસ્તિકા મેળવી લેવી. આ માટે ઉમેદવારને પાંચ (૫) મિનિટનો સમયગાળો આપવામાં આવશે. પછીથી, પ્રશ્નપુસ્તિકા બદલવામાં આવશે નહીં કે કોઈ વધારાનો સમયગાળો આપવામાં આવશે નહીં.
   (iii) આ ચકાસણી સમાપ્ત થાય પછી, પ્રશ્નપુસ્તિકાનો નંબર OMR જવાબ પત્રક પર લખવો અને OMR જવાબ પત્રકનો નંબર પ્રશ્નપુસ્તિકા પર લખવો.
4. પ્રત્યેક પ્રશ્ન માટે ચાર જવાબ વિકલ્પ (A), (B), (C) અને (D) આપવામાં આવેલ છે. તમારે સાચા જવાબના ઓવલ (oval) ને નીચે આપેલ ઉદાહરણ મુજબ પેનથી ભરીને સંપૂર્ણ કાળું કરવાનું રહેશે.

   **ઉદાહરણ** : (A) ⬬ (C) (D) કે જ્યાં (B) સાચો જવાબ છે.
5. આ પ્રશ્નપુસ્તિકાના પ્રશ્નોના જવાબ અલગથી આપવામાં આવેલ OMR જવાબ પત્રકમાં પેપર-II લખેલ વિભાગમાં જ અંકિત કરવા. જો આપ OMR જવાબ પત્રકમાં આપેલ ઓવલ (oval) સિવાય અન્ય સ્થાને જવાબ અંકિત કરશો તો તે જવાબનું મૂલ્યાંકન કરવામાં આવશે નહીં.
6. કાચું કામ (Rough work) પ્રશ્નપુસ્તિકાના અંતિમ પૃષ્ઠ પર કરવું.
7. જો આપ OMR જવાબ પત્રક નિયત જગ્યા સિવાય અન્ય કોઈપણ સ્થાને, આપનું નામ, રોલ નંબર, ફોન નંબર અથવા એવું કોઈ ચિહ્નકે જેનાથી તમારી ઓળખ થઈ શકે, અંકિત કરશો અથવા અભદ્ર ભાષાનો પ્રયોગ કરો, અથવા અન્ય કોઈ અનુચિત સાધનોનો ઉપયોગ કરો, જેમકે અંકિત કરી દીધેલ જવાબ ભૂંસી નાખવો કે સફેદ શાહીનો ઉપયોગ કરી બદલશો તો આપને પરીક્ષા માટે અયોગ્ય જાહેર કરવામાં આવશે.
8. પરીક્ષા સમય પૂરો થઈ ગયા બાદ ઓરીજીનલ OMR જવાબ પત્રક જે તે નિરીક્ષકને ફરજિયાત સોંપી દેવું અને કોઈ પણ સંજોગોમાં તે પરીક્ષા ખંડની બહાર લઈ જવું નહીં. પરીક્ષા પૂર્ણ થયા બાદ ઉમેદવાર ઓરીજીનલ પ્રશ્નપુસ્તિકા અને OMR જવાબ પત્રકની ડુપ્લિકેટ કોપી પોતાની સાથે લઈ જઈ શકે છે.
9. માત્ર કાળી / ભૂરી બૉલ પોઈન્ટ પેન વાપરવી.
10. કેલ્ક્યુલેટર,લૉગ ટેબલ અને અન્ય ઈલેક્ટ્રોનિક યંત્રોનો ઉપયોગ કરવાની મનાઈ છે.
11. ખોટા જવાબ માટે નકારાત્મક ગુણાંકન પ્રથા નથી.

Prepp+ Subscription
Only ~~₹999~~ ₹249/year
500+ Exams | 1 Year Full Access | 50,000+ Mock tests | 10,000+ Pyp's
Unlock Your Success Today!
LIMITED TIME OFFER

Prepp
Your Personal Exams Guide

DO NOT WRITE HERE

Prepp
Your Personal Exam Guide

Prepp+ Subscription
Only (₹999) ₹249/year
500+ Exams
1 Year Full Access
50,000+ Mock tests
10,000+ Pyp's
Unlock Your Success Today!
LIMITED TIME OFFER

www.prepp.in
Prepp
Your Personal Exams Guide

## SANSKRIT
## Paper – II

1. 'तद्दोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि' – अस्मिन् काव्यलक्षणे 'अनलङ्कृती' – इत्यत्र का विभक्तिः किं च वचनम् ?
   (A) प्रथमा, एकवचनम्
   (B) प्रथमा, द्विवचनम्
   (C) द्वितीया, द्विवचनम्
   (D) द्वितीया, बहुवचनम्

2. भर्तृहरिणा सृष्टिप्रक्रियायां स्वीकृतं दर्शनम् ________ ।
   (A) परिणामवादः
   (B) विज्ञानवादः
   (C) विवर्तवादः
   (D) आरम्भवादः

3. हरिरलम् इत्यत्र रिक्तस्थानस्य पूर्तये समुचितः विकल्पः अस्ति ________ ।
   (A) दैत्यैः
   (B) दैत्येभ्यः
   (C) दैत्यानाम्
   (D) दैत्येषु

4. भू इ स्य मिप् – अत्र मिपि परतः अङ्गसंज्ञा भवति ________ ।
   (A) 'भू' इत्यस्य
   (B) 'भू इ' इत्यस्य
   (C) 'भू इ स्य' इत्यस्य
   (D) 'भू इ स्य मिप्' इत्यस्य

5. आबन्तात् सर्वनाम्नः परस्याः ङिद्विभक्तेः आगमो भवति ________ ।
   (A) आट्
   (B) याट्
   (C) नुट्
   (D) स्याट्

6. 'नादिचि' – सूत्रेण निषेधो भवति ________
   (A) पूर्वपरयोः स्थाने पररूपस्य एकादेशस्य ।
   (B) पूर्वपरयोः स्थाने वृद्धिरेकादेशस्य ।
   (C) पूर्वपरयोः स्थाने पूर्वसवर्णदीर्घरूपस्य एकादेशस्य ।
   (D) प्रकृतिवद्भावस्य ।

[redacted]

Prepp+ Subscription
Only (₹999) ₹249/year
500+ Exams | 1 Year Full Access | 50,000+ Mock tests | 10,000+ Pyp's
Unlock Your Success Today!
LIMITED TIME OFFER

Prepp
Your Personal Exams Guide

7. 'स्थानिवदादेशोऽनल्विधौ' इत्यस्मिन् 'अनल्विधि:' इति समासे अधोलिखितो विग्रहो नास्ति ।
(A) अला विधि: (B) अले विधि: (C) अल: विधि: (D) अलि विधि:

8. भार्या राज्ञ: पुरुषो देवदत्तस्य । अत्र 'राज्ञ: पुरुष:' इत्यत्र समासो न भवति, यत: ____
(A) 'राज्ञ:' पदे पञ्चमी विभक्तिरस्ति, षष्ठी नास्ति ।
(B) अत्र 'राज्ञ: पुरुष:' इत्यत्र सामर्थ्यं नास्ति ।
(C) समासस्य विधानं सर्वत्र वैकल्पिकम् अस्ति ।
(D) सर्वाणि इमानि असत्यकथनानि ।

9. भसंज्ञकस्य अङ्गस्य लोपकारकं सूत्रमस्ति ________ ।
(A) आतो धातो:
(B) स्वमोर्नपुंसकात्
(C) यचि भम्
(D) भस्य

10. 'चेयम्' इत्यत्र गुणविधायकं सूत्रम् ________ ।
(A) अदेङ् गुण:
(B) सार्वधातुकार्धधातुकयो:
(C) ऱ्हस्वस्य गुण:
(D) ओर्गुण:

11. अधोलिखितानाधारीकृत्य समुचितं विकल्पं चिनुत ।

a. शालिनी — i. एकविंशत्यक्षराणि
b. स्रग्धरा — ii. द्वादशाक्षराणि
c. मन्दाक्रान्ता — iii. एकादशाक्षराणि
d. द्रुतविलम्बितम् — iv. सप्तदशाक्षराणि

**विकल्पा:**

| | a | b | c | d |
|---|---|---|---|---|
| (A) | iii | iv | ii | i |
| (B) | ii | i | iv | iii |
| (C) | iii | i | iv | ii |
| (D) | iv | iii | ii | i |

[redacted]

Prepp+ Subscription
Only (₹999) ₹249/year
500+ Exams | 1 Year Full Access | 50,000+ Mock tests | 10,000+ Pyp's
Unlock Your Success Today!
LIMITED TIME OFFER

www.prepp.in

Prepp
Your Personal Exams Guide

12. तपःस्वाध्यायेश्वरप्रणिधानानि ________ ।

(A) वृत्तयः
(B) क्लेशाः
(C) महायोगः
(D) क्रियायोगः

13. किं नामोच्यते अथर्ववेदस्य ऋत्विजः ?

(A) ब्रह्मा
(B) उद्गाता
(C) होता
(D) अध्वर्युः

14. 'सत्कार्यवादः' केन दर्शनेन सम्बद्धः ?

(A) साङ्ख्येन
(B) वेदान्तेन
(C) न्यायेन
(D) मीमांसया

15. अशोकस्य गिरनार-शिलालेखः कस्यां लिपौ वर्तते ?

(A) ब्राह्मी
(B) खरोष्ठी
(C) देवनागरी
(D) नेवारी

16. मम्मटानुसारं काव्यप्रयोजनेषु सद्यःपरनिर्वृतिः इत्यत्र निर्वृतिपदस्य कोऽर्थः ?

(A) मोक्षः
(B) आनन्दः
(C) लाभः
(D) सन्तोषः

17. कुशिक-सगरस्योल्लेखः कुत्र प्राप्यते ?

(A) दशकुमारचरिते
(B) उत्तररामचरिते
(C) बुद्धचरिते
(D) रत्नावल्याम्

18. 'विश्ववारा' का अस्ति ?

(A) दितिः
(B) अदितिः
(C) उषाः
(D) पृथिवी

19. ऋक् 1.25 इत्यस्मिन् सूक्ते 'क्षत्रश्रियः' कस्य विशेषणमस्ति ?

(A) अग्नेः
(B) इन्द्रस्य
(C) वरुणस्य
(D) सूर्यस्य

[redacted]

Prepp+ Subscription
Only (₹999) ₹249/year
500+ Exams | 1 Year Full Access | 50,000+ Mock tests | 10,000+ Pyp's
Unlock Your Success Today!
LIMITED TIME OFFER

www.prepp.in

Prepp
Your Personal Exams Guide

**20.** अधोदत्तेषु वेदपुरुषस्य घ्राणं किम् ?

(A) कल्पः (B) व्याकरणम् (C) शिक्षा (D) निरुक्तम्

**21.** ऋक्प्रातिशाख्यानुसारम् अधोलिखितेषु किं सन्ध्यक्षरम् ?

(A) ऊ (B) क्ष (C) ऋ (D) ऐ

**22.** 'अकथितं च ।' इति कीदृशं सूत्रमस्ति ?

(A) अधिकारसूत्रम्
(B) विधिसूत्रम्
(C) संज्ञासूत्रम्
(D) नियमसूत्रम्

**23.** 'अहं ब्रह्मास्मि' इति महावाक्यं ___________ वर्तते ।

(A) केनोपनिषदि
(B) कठोपनिषदि
(C) तैत्तिरीयोपनिषदि
(D) बृहदारण्यकोपनिषदि

**24.** 'अष्टौ नाट्ये रसाः स्मृताः' कस्य उक्तिरियम् ?

(A) विश्वनाथकविराजस्य
(B) दण्डिनः
(C) भरतमुनेः
(D) आनन्दवर्धनस्य

**25.** नारदीयशिक्षा कस्य वेदस्य शिक्षा–वेदाङ्गमस्ति ?

(A) ऋग्वेदस्य
(B) सामवेदस्य
(C) यजुर्वेदस्य
(D) अथर्ववेदस्य

**26.** निम्नलिखितेषु का कृतिः महाभारताधारिता नास्ति ?

(A) मध्यमव्यायोगः
(B) अभिज्ञानशाकुन्तलम्
(C) प्रतिमानाटकम्
(D) शिशुपालवधम्

**27.** मौर्यवंशस्य वर्णनं कस्मिन् पुराणे श्रूयते ?

(A) विष्णुपुराणे
(B) श्रीमद्भागवते
(C) स्कन्दपुराणे
(D) वामनपुराणे

[redacted]

Prepp+ Subscription
Only ~~(₹999)~~ ₹249/year
500+ Exams | 1 Year Full Access | 50,000+ Mock tests | 10,000+ Pyp's
Unlock Your Success Today!
LIMITED TIME OFFER

www.prepp.in
Prepp
Your Personal Exams Guide

**28.** एतेषु शुद्धं वाक्यमस्ति ____________ ।

(A) गुरूपदेशम् असूयन्ति अभिमानिन: ।
(B) वयं सर्वेऽपि भ्रमणाय गच्छन्ति ।
(C) धर्मं विना सुखं नास्ति ।
(D) मोदकं कं न रोचते ।

**29.** 'पादस्याविर्भवन्तीमवनतिमवने: रक्षत: स्वैरपातै: ।' अस्मिन् पद्यांशे छन्द: निर्दिशत ।

(A) स्रग्धरा
(B) शार्दूलविक्रीडितम्
(C) शिखरिणी
(D) हरिणी

**30.** षड्विधसन्निकर्षेषु नास्ति ____________ ।

(A) समवाय:
(B) संयुक्तसमवाय:
(C) संयुक्तसमवेतसमवाय:
(D) समवेतसंयुक्तसन्निकर्ष:

**31.** 'महनीया महानुभावा: भवन्ति ।' सूक्तिरियं कुत: ?

(A) रत्नावलीत:
(B) हर्षचरितत:
(C) कादम्बरीत:
(D) नलचम्पूत:

**32.** आचार्यकुन्तकेन कतिविधा कविव्यापारवक्रता वर्णिता ?

(A) षड्विधा
(B) सप्तविधा
(C) नवविधा
(D) दशविधा

**33.** अधोदत्तेषु किं काण्डं रामायणे प्रक्षिप्तं मन्यते ?

(A) सुन्दरकाण्डम्
(B) युद्धकाण्डम्
(C) अयोध्याकाण्डम्
(D) किष्किन्धाकाण्डम्

**34.** क्रियाशक्तिमान् कार्यरूप: ____________ ।

(A) अन्नमयकोश:
(B) प्राणमयकोश:
(C) मनोमयकोश:
(D) विज्ञानमयकोश:

[redacted]

Prepp+ Subscription
Only (₹999) ₹249/year
500+ Exams | 1 Year Full Access | 50,000+ Mock tests | 10,000+ Pyp's
Unlock Your Success Today!
LIMITED TIME OFFER

35. बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निर्वतनम् __________।

(A) उपरतिः (B) शमः (C) दमः (D) तितिक्षा

36. रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्वम् __________ ।

(A) अध्यारोपः (B) अपवादः

(C) अज्ञानम् (D) विवर्तम्

37. साङ्ख्यमतानुसारेण प्रत्ययसर्गस्य भेदाः कति ?

(A) त्रिंशत् (B) चत्वारिंशत्

(C) पञ्चाशत् (D) षष्टिः

38. विश्वनाथमते काव्ये अलङ्काराः कथं विराजन्ते ?

(A) अवयवसंस्थानवत् (B) कटककुण्डलादिवत्

(C) आत्मवत् (D) शौर्यादिवत्

39. भरतस्य नाट्यशास्त्रे कति रसदोषाः प्रदर्शिताः ?

(A) सप्त (B) नव (C) एकादश (D) त्रयोदश

40. अनुमितिवादप्रस्थाने 'चित्रतुरगन्यायम्' प्रस्तौति __________ ।

(A) भट्टनायकः (B) शङ्कुकः

(C) अभिनवगुप्तः (D) भट्टलोल्लटः

41. 'न युक्तमनभिवाद्य गुरून् गन्तुम्' वेणीसंहारे पञ्चमे अङ्के कस्येयमुक्तिः ?

(A) भीमस्य (B) अर्जुनस्य

(C) दुर्योधनस्य (D) युधिष्ठिरस्य

42. याज्ञवल्क्यस्मृतौ व्यवहाराध्याये कति दिव्यप्रयोगाः उल्लिखिताः ?

(A) द्वौ (B) त्रयः (C) पञ्च (D) सप्त

[redacted]

Prepp+ Subscription
Only ~~(₹999)~~ ₹249/year
500+ Exams | 1 Year Full Access | 50,000+ Mock tests | 10,000+ Pyp's
Unlock Your Success Today!
LIMITED TIME OFFER

www.prepp.in

Prepp
Your Personal Exams Guide

43. हर्षस्य बांसखेडा–ताम्रपत्राऽभिलेख: कुत: प्राप्त: ?

(A) गिरनारत: (B) मथुरात: (C) कानपुरत: (D) शाहजहाँपुरत:

44. ऐहोलशिलालेख: कस्यास्ति ?

(A) अशोकस्य
(B) चन्द्रगुप्तद्वितीयस्य
(C) पुलकेशिन: द्वितीयस्य
(D) समुद्रगुप्तस्य

45. प्रयाग–स्तम्भलेखस्य निर्माता क: ?

(A) स्कन्दगुप्त: (B) समुद्रगुप्त: (C) अशोक: (D) यशोधर्मा

46. कार्यावस्था: भवन्ति ______________ ।

(A) तिस्र: (B) चतस्र: (C) पञ्च (D) षट्

47. उत्तररामचरिते नदीदेवता का ?

(A) मुरला (B) वासन्ती (C) शान्ता (D) तरला

48. 'दुरवगाहा गतिर्दैवस्य' रत्नावल्यां चतुर्थे अङ्के कस्येयमुक्ति: ?

(A) वसुभूते:
(B) उदयनस्य
(C) वासवदत्ताया:
(D) यौगन्धरायणस्य

49. कौटिल्यमते कति विद्या: विद्यन्ते ?

(A) द्वे (B) तिस्र: (C) चतस्र: (D) पञ्च

50. 'अलङ्कारो हि नारीणां क्षमा तु पुरुषस्य वा' इति कुत: ?

(A) रामायणात्
(B) महाभारतात्
(C) विष्णुपुराणात्
(D) अग्निपुराणात्

51. 'यस्मात् पुरा हि अनति इदं पुराणम्' इति कस्य वचनम् ?

(A) वायुपुराणस्य (B) विष्णुपुराणस्य (C) अग्निपुराणस्य (D) यास्कस्य

[redacted]

Prepp+ Subscription
Only (₹999) ₹249/year
500+ Exams | 1 Year Full Access | 50,000+ Mock tests | 10,000+ Pyp's
Unlock Your Success Today!
LIMITED TIME OFFER

www.prepp.in

Prepp
Your Personal Exams Guide

52. यास्कमते नामलक्षणं किम् ?

(A) सत्त्वप्रधानम्
(B) भावप्रधानम्
(C) उपसर्गप्रधानम्
(D) धातुप्रधानम्

53. 'कस्मै देवाय हविषा विधेम' – इति मन्त्र: कस्मिन् सूक्ते वर्तते ?

(A) नासदीयसूक्ते
(B) हिरण्यगर्भसूक्ते
(C) पुरुषसूक्ते
(D) अग्निसूक्ते

54. 'सत्यं वद धर्मं चर स्वाध्यायान्मा प्रमद:' कुत्र प्राप्यते ?

(A) केनोपनिषदि
(B) श्वेताश्वतरोपनिषदि
(C) ईशावास्योपनिषदि
(D) तैत्तिरीयोपनिषदि

55. काशिकावृत्ते: प्रणेतारौ कौ ?

(A) नागेशकैय्यटौ
(B) वामनजयादित्यौ
(C) पाणिनिपतञ्जली
(D) हेमचन्द्रशाकटायनौ

56. 'दधामि' इत्यत्र धाधातो: धकारस्य दकारपरिवर्तनं कस्य ध्वनिनियमस्योदाहरणम् अस्ति ?

(A) ग्रिममहोदयस्य
(B) ग्रासमानमहोदयस्य
(C) बोप्पमहोदयस्य
(D) वेर्नरमहोदयस्य

57. च् इति वर्ण: ____________ अस्ति ।

(A) दन्त्य:
(B) कण्ठ्य:
(C) तालव्य:
(D) जिह्वामूलीय:

58. सांख्यमते प्रमाणमिष्टं ____________।

(A) त्रिविधम्
(B) चतुर्विधम्
(C) पञ्चविधम्
(D) षड्विधम्

59. कादयो मावसाना वर्णा: भवन्ति ____________।

(A) अन्त:स्था:
(B) स्पर्शा:
(C) ऊष्माण:
(D) जिह्वामूलीया:

[redacted]

Prepp+ Subscription
Only (₹999) ₹249/year
500+ Exams
1 Year Full Access
50,000+ Mock tests
10,000+ Pyp's
Unlock Your Success Today!
LIMITED TIME OFFER

www.prepp.in

Prepp
Your Personal Exams Guide

**60.** विशेषसंज्ञाविनिर्मुक्तः समासः नाम ____________।

(A) नित्यसमासः

(B) अनित्यसमासः

(C) केवलसमासः

(D) तत्पुरुषसमासः

**61.** ब्राह्मीलिपेः उद्वाचने प्रथमां सफलतां प्राप्तवान् ____________।

(A) मेक्सम्यूलर

(B) विलियमजोन्स्

(C) जेम्स प्रिन्सेप्

(D) व्हिट्नी

**62.** उदात्तात् परस्य अनुदात्तस्य परिवर्तनं किम् ?

(A) स्वरितः

(B) प्रचयः

(C) सन्नतरः

(D) उदात्ततरः

**63.** चिनीभाषा कस्मिन् भाषावर्गे समावेशम् अर्हति ?

(A) योगात्मकभाषावर्गे

(B) विभक्तियुक्तभाषावर्गे

(C) अयोगात्मकभाषावर्गे

(D) संश्लेषात्मकभाषावर्गे

**64.** 'हरी एतौ' इत्यत्र किं सन्धिरूपं युक्तम् ?

(A) हर्येतौ

(B) हरयेतौ

(C) हर्यतौ

(D) हरी एतौ

**65.** 'पितरौ' इति समस्तस्य पदस्य लौकिकं विग्रहवाक्यं किम् ?

(A) मातापितरौ

(B) माता च पिता च

(C) पिता मात्रा

(D) मातृ च पितृ च

**66.** 'हरेऽव' इत्यत्र संधिविग्रहः कः ?

(A) हरे इव

(B) हरे एव

(C) हर इव

(D) हरे अव

**67.** 'अभवतम्' इत्यत्र किं कर्तृपदं युक्तम् ?

(A) तौ

(B) युवाम्

(C) यूयम्

(D) आवाम्

Prepp+ Subscription
Only ~~(₹999)~~ ₹249/year
500+ Exams | 1 Year Full Access | 50,000+ Mock tests | 10,000+ Pyp's
Unlock Your Success Today!
LIMITED TIME OFFER

www.prepp.in

Prepp
Your Personal Exams Guide

68. शब्द: नाम ____________ ।

(A) द्रव्यम्
(B) क्रिया
(C) आकृति:
(D) प्रतीतपदार्थको ध्वनि:

69. भर्तृहरिग्रन्थत्वेन न परिगण्यते ____________ ।

(A) महाभाष्यटीका
(B) शिवदृष्टि:
(C) शतकत्रयम्
(D) शब्दधातुसमीक्षा

70. सिद्धे शब्दार्थसंबन्धे इत्यत्र सिद्धशब्द: ____________।

(A) पूर्णार्थवाची
(B) नानात्ववाची
(C) नित्यपर्यायवाची
(D) अनित्यपर्यायवाची

71. ग्राह्यत्वं ग्राहकत्वं च कस्य द्वे शक्ती इति उक्तम् ?

(A) अर्थस्य
(B) शब्दस्य
(C) ब्रह्मण:
(D) जगत:

72. 'देवास:' इत्यत्र का विभक्ति: किं च वचनम् ?

(A) प्रथमा एकवचनम्
(B) प्रथमा बहुवचनम्
(C) षष्ठी एकवचनम्
(D) षष्ठी बहुवचनम्

73. राष्ट्राभिवर्धनम् इति सूक्तस्य ऋषि: क: ?

(A) बृहस्पति:
(B) ब्रह्मणस्पति:
(C) वसिष्ठ:
(D) विश्वामित्र:

74. 'रथिकाश्वारोहम्', इह 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' इति सूत्रेण किं विधीयते ?

(A) रथिकशब्दस्य पूर्वप्रयोग:
(B) नपुंसकलिङ्गम्
(C) एकवद्भाव:
(D) द्वन्द्वसमास:

75. "उपाध्यायादधीते" अत्र अपादानसंज्ञा विधीयते अनेन सूत्रेण ____________ ।

(A) अकथितं च
(B) स्पृहेरीप्सित:
(C) आख्यातोपयोगे
(D) भुवश्च प्रभव:

Prepp+ Subscription
Only ~~(₹999)~~ ₹249/year
500+ Exams | 1 Year Full Access | 50,000+ Mock tests | 10,000+ Pyp's
Unlock Your Success Today!
LIMITED TIME OFFER

www.prepp.in

Your Personal Exams Guide

76. 'विश्वंभरा' इति विशेषणेन ऋषिणा का स्तूयते ?

(A) उषा: (B) पृथिवी (C) नदी (D) उर्वशी

77. त्रेतायां किं परमिति मनुना उक्तम् ?

(A) तप: (B) ज्ञानम् (C) यज्ञ: (D) दानम्

78. ऋग्वेदे जीरदानु: इति कस्य विशेषणम् ?

(A) पर्जन्यस्य (B) सोमस्य (C) वरुणस्य (D) अग्ने:

79. नाध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसा: । अस्मिन् पद्यांशे अलंकारोऽस्ति ________।

(A) उपमा

(B) विभावना

(C) विशेषोक्ति:

(D) अप्रस्तुतप्रशंसा

80. विश्रुतचरितानुसारं पुण्यवर्मण: अनन्तरम् अवनिमध्यतिष्ठत् ________।

(A) गृहवर्मा (B) भास्करवर्मा (C) अनन्तवर्मा (D) प्रचण्डवर्मा

81. द्वयो: छन्दसो: मेलनेन निष्पद्यते ________।

(A) उपेन्द्रवज्रा (B) उपजाति: (C) वसन्ततिलका (D) वंशस्थम्

82. ''काव्यस्यात्मा स एवार्थ: ....'' इत्यनेन अभिप्रेतोऽस्ति ________ ।

(A) वस्तुध्वनि:

(B) अलङ्कारध्वनि:

(C) रसादिध्वनि:

(D) भावध्वनि:

83. ''काव्यस्यात्मा ध्वनिरिति ....'' इत्यंशे 'आत्मा' शब्दस्य विवृतये सम्यक् पदमस्ति ________ ।

(A) जीवनम् (B) तत्त्वम् (C) अर्थ: (D) प्राण:

84. 'षाण्मातुर:' इत्यत्र द्विगु: वर्तते ________ ।

(A) समाहारस्य अर्थे

(B) तद्धिते विषये

(C) उत्तरपदे परत:

(D) समुच्चये वाच्ये

[redacted]

Prepp+ Subscription
Only (₹999) ₹249/year
500+ Exams | 1 Year Full Access | 50,000+ Mock tests | 10,000+ Pyp's
Unlock Your Success Today!
LIMITED TIME OFFER

Prepp
Your Personal Exams Guide

85. पस्पशायां व्याकरणस्य प्रयोजनरूपेण किं न पठितम् ?
(A) ऊहः (B) असंदेहः (C) मोक्षः (D) अविद्वांसः

86. प्राकृतः वैकृतश्च कस्य द्वौ प्रकारौ इति उक्तम् ?
(A) ध्वनेः (B) स्फोटस्य (C) अर्थस्य (D) ब्रह्मणः

87. 'सर्वज्ञं ब्रह्म जगतः कारणं नान्यत् किमपि' – इति बादरायणेन केन सूत्रेण प्रतिपादितम् ?
(A) श्रुतत्वाच्च
(B) तद्धेतुव्यपदेशाच्च
(C) भेदव्यपदेशाच्चान्यः
(D) स्वाप्ययात्

88. 'अप्यनामयमस्य प्रजापालकस्य मातुः' इति को वक्ति उत्तररामचरिते ?
(A) कञ्चुकी (B) सौधातकिः (C) जनकः (D) दाण्डायनः

89. अधोनिर्दिष्टेषु समूहबाह्यं निष्कासयत ।
(A) सांख्यम् (B) काणादम् (C) जैमिनीयम् (D) बौद्धम्

90. 'महीयांसः प्रकृत्या मितभाषिणः' इत्युक्तिः कस्य ?
(A) कालिदासस्य (B) भवभूतेः (C) दण्डिनः (D) माघस्य

91. पम्पासरोवरवर्णनं रामायणस्य कस्मिन् काण्डे अस्ति ?
(A) अयोध्याकाण्डे
(B) बालकाण्डे
(C) किष्किन्धाकाण्डे
(D) युद्धकाण्डे

92. वर्णेकरविरचितं काव्यमस्ति ______________ ।
(A) शिवराजविजयम्
(B) शिवराजोदयम्
(C) शिवराज्योदयम्
(D) शिवराजचरितम्

93. अभूत् अभूताम् ______________। रिक्तस्थानं पूरयत ।
(A) अभवन् (B) अभवन्त (C) अभूवन् (D) अभुवन्

[redacted]

Prepp+ Subscription
Only ~~(₹999)~~ ₹249/year
500+ Exams
1 Year Full Access
50,000+ Mock tests
10,000+ Pyp's
Unlock Your Success Today!
LIMITED TIME OFFER

www.prepp.in
Prepp
Your Personal Exams Guide

94. 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः ।' अस्मिन् योगसूत्रे व्यासभाष्यानुसारं 'कर्म' इत्यत्र कर्माणि कानि ?

(A) कुशलाऽकुशलानि
(B) प्रायश्चित्तानि
(C) काम्यानि
(D) निषिद्धानि

95. नाट्यं रूपकमिति कथ्यते ____________ ।

(A) नटे रामादिस्वरूपारोपात्
(B) रूपकालंकारस्य प्राचुर्यात्
(C) नटे रामाद्यवस्थारोपात्
(D) नटस्य मुखे चन्द्रमसः आरोपात्

96. विश्वामित्रनदीसूक्ते श्रुतं नदीनाम किम् ?

(A) सरस्वती
(B) असिक्नी
(C) शुतुद्री
(D) वितस्ता

97. अक्षसूक्तस्य ऋषिः कः ?

(A) विश्वामित्रः
(B) वसिष्ठः
(C) आनन्दकर्दमः
(D) कवष ऐलूषः

98. 'जीवाजीवाख्ये द्वे तत्त्वे स्तः' इतीदं मतमस्ति ____________ ।

(A) चार्वाकस्य
(B) आर्हतानाम्
(C) बौद्धानाम्
(D) वेदान्तिनाम्

99. नैषधकाव्ये भूजानिः इत्यस्य कोऽर्थः ?

(A) भूरुहः
(B) भूजलम्
(C) भूकम्पः
(D) भूपालः

100. 'अहो दुरन्ता बलवद्विरोधिता' इत्युक्तिः कस्मिन् काव्ये उपलब्धा ?

(A) रघुवंशे
(B) किरातार्जुनीये
(C) शिशुपालवधे
(D) नैषधीयचरिते

[redacted]

Prepp+ Subscription
Only (₹999) ₹249/year
500+ Exams
1 Year Full Access
50,000+ Mock tests
10,000+ Pyp's
Unlock Your Success Today!
LIMITED TIME OFFER

Prepp
Your Personal Exams Guide

**Space for Rough Work**

Prepp Your Personal Exam Guide

[redacted]

Prepp+ Subscription
Only (₹999) ₹249/year
500+ Exams
1 Year Full Access
50,000+ Mock tests
10,000+ Pyp's
Unlock Your Success Today!
LIMITED TIME OFFER